# Shri Laharamacharyapranitam Shrivaishnavadharmapiyusham

# શ્રીલાહારામાચાર્યપ્રણીતમ્ શ્રીવૈષ્ણવધર્મપીયૂષં

## Document Information

Text title : Shri Laharamacharyapranitam Shrivaishnavadharmapiyusham

File name : vaiShNavadharmapIyUShaMlAhArAmAchArya.itx

Category : raama, rAmAnanda

Location : doc_raama

Author : lAhArAmAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# શ્રીલાહારામાચાર્યપ્રણીતમ્ શ્રીવૈષ્ણવધર્મપીયૂષં

જગતઃ કારણં રામં સર્વેશં મુક્તિદં તથા ।
આનન્દભાષ્યકર્ત્તારં રામાનન્દં સમાશ્રયે ॥ ૧॥

બોધાબ્ધિં ચ ગુરું નત્ત્વા ટીલાર્યં બ્રહ્મચારિણમ્ ।
વૈષ્ણવધર્મપીયૂષં કુર્વે મૃત્યુભયાપહમ્ ॥ ૨॥

ઉત્થાય જાનકીરામૌ સ્તુત્વા ગુરુપરમ્પરામ્ ।
શુદ્ધઃ સ્નાનાદિના ભૂત્વા ચોર્ધ્વપુણ્ડ્રં વિધાય હિ ॥ ૩॥

સન્ધ્યામુપાસ્ય રામં ચ સીતયા સહ પૂજયેત્ ।
સ્તુત્વા નત્ત્વા ચ, શ્રીરામં નમેદ્ ગુરું ચ વૈષ્ણવાન્ ॥ ૪॥

રામપાદોદકં પીત્વા નૈવેદ્યં ભક્ષયેદ્બુધૈઃ ।
પૂર્વાચાર્યપ્રબન્ધાશ્ચ રામાયણં ચ સમ્પઠેત્ ॥ ૫॥

લૌકિકં ચ તતઃ કર્મ કુર્યાચ્છ્રીવૈષ્ણવઃ સદા ।
કર્ત્તવ્યો વૈષ્ણવૈર્નૂનં શ્રીવૈષ્ણવવ્રતોત્સવૌ ॥ ૬॥

હિતં મિતં ચ વક્તવ્યં સત્યં ચ મધુરં વચઃ ।
હિતં મિતં ચ ભોક્તવ્યં શુદ્ધમન્નં ચ સાત્વિકમ્ ॥ ૭॥

રામાશ્રિતો ભવેન્માનમદાભ્યાં વર્જિતસ્તથા ।
ફલં સમીક્ષ્ય કર્ત્તા ચ બાહ્યાભ્યન્તઃ શુચિ સદા ॥ ૮॥

અસક્તો વિષયેષ્વત્ર દાતા નિયતજીવનઃ ।
શુદ્ધાચારવિહારશ્ચ સંયતેન્દ્રિયસંહતિઃ ॥ ૯॥

સ્થિરઃ પુષ્ટશ્ચ ધર્મેણ શરીરે સ્વસ્થતાં ગતઃ ।
વર્જિતો ભયરાગાભ્યાં વિપન્નાપન્નિવારકઃ ॥ ૧૦॥

ક્ષમાવાન્ સમતાયુક્ત ઉદારઃ સાધુસેવકઃ ।
સર્વકલ્યાણકર્ત્તા ચ સેવાભાવસમન્વિતઃ ॥ ૧૧॥

દીર્ઘાયુઃ સુખયુક્તશ્ચ સદાચારી ભવેન્નરઃ ।
દુર્બલો દુઃખભાગી ચ દુરાચારી હિ નિન્દિતઃ ॥ ૧૨॥

શુભમેવ મતં ચાત્ર શુભસ્ય કર્મણઃ ફલમ્ ।
અશુભકર્મણશ્ચાથાશુભમેવ ફલં મતમ્ ॥ ૧૩॥

અલોભઃ સુખમૂલં હિ લોભઃ પાપસ્ય કારણમ્ ।
જ્ઞાનાદ્ ભક્તિસ્તતો મુક્તિસ્ત્વભક્તિર્બન્ધકારણમ્ ॥ ૧૪॥

કામઃ ક્રોધશ્ચ લોભશ્ચ હેયાઃ કલ્યાણભક્ષકાઃ ।
દમો દયા ચ દાનં ચોપેયાઃ કલ્યાણરક્ષકાઃ ॥ ૧૫॥

શ્રેયાન્ હિ કર્મકર્ત્તાઽસ્તિ કર્મહીનાચ્ચ માનવાત્ ।
રામાય ચાર્પિતં કર્મ મુક્તિદં ચોત્તમં મતમ્ ॥ ૧૬॥

સદ્વિદ્યામુત્પત્ત્યૈ સત્સઙ્ગઃ ક્રિયતાં સદા ।
શ્રદ્ધયાઽથ ચ કાર્યં સદ્ગ્રન્થાનાં પરિશીલનમ્ ॥ ૧૭॥

વિષયાદ્ વિનિવર્ત્યાથ ચેન્દ્રિયાણાં ગણઃ ખલુ ।
સન્નિયોજ્યશ્ચ રામસ્ય કૈઙ્કર્યે શ્રદ્ધયા સદા ॥ ૧૮॥

સઙ્કીર્ત્તનં ચ રામસ્ય નામ્નશ્ચ યશસઃ શુભમ્ ।
કર્ત્તવ્યં માનવૈર્નિત્યં બન્ધભિન્મોક્ષદાયકમ્ ॥ ૧૯॥

અહેતુક્યા અમોઘાયા અનન્તાયાસ્તથૈવ ચ ।
કાર્યો રામકૃપાયાશ્ચ વિશ્વાસઃ સુખદાયકઃ ॥ ૨૦॥

ઉપકારપરો ભૂયાદપરાધિજનેષ્વપિ ।
અસન્તઃ સન્તુ સન્તશ્ચ શ્રીરામં પ્રાર્થયેદિતિ ॥ ૨૧॥

રક્ષણીયશ્ચ ધર્મો હિ ચૌર્યં કાર્યં ન કર્હિચિત્ ।
દ્યૂતક્રીડા ન કર્ત્તવ્યા માંસં ભક્ષ્યં ન માનવૈઃ ॥ ૨૨॥

પરહિંસા ન કર્ત્તવ્યા ત્યાજ્યા પરધનસ્પૃહા ।
પરદારા ન ગન્તવ્યાઃ પરધર્મો ભયાવહઃ ॥ ૨૩॥

કદાચિદપિ નો કુર્યાદ્ વિરક્તો હિ ગૃહસ્થતામ્ ।
યતસ્તસ્યાશ્ચ શાસ્ત્રેષુ પ્રાયશ્ચિત્તં ન વિદ્યતે ॥ ૨૪॥

કાર્યો વિશ્વાસઘાતો ન ત્યાજ્યં ચ વ્યસનં જનૈઃ ।
ભયદાનાદ્ ભયં કાર્યં દ્વેષઃ કાર્યશ્ચ દ્વેષતઃ ॥ ૨૫॥

ન ત્યાજ્યં કિન્તુ કર્ત્તવ્યં યજ્ઞો દાનં તથા તપઃ ।
અર્પણીયં કૃતં કર્મ રામાય પરમાત્મને ॥ ૨૬॥

ત્યાજ્યમેવ ન કર્ત્તવ્યં નરૈર્વિષયચિન્તનમ્ ।
ભક્તૌ બાધાં વિધાયાત્ર ત્યજન્તિ વિષયા જનમ્ ॥ ૨૭॥

દૈવીસમ્પદ્ધિ સંરક્ષ્યા ત્યાજ્યા સમ્પત્તિરાસુરી ।
દૈવ્યા હિ સમ્પદા સૌખ્યં દુઃખં ચાસુરસમ્પદા ॥ ૨૮॥

ભક્ત્યાઽથવા પ્રપત્ત્યા વા રામો લભ્યો ન ચાન્યથા ।
નાધિકં ભગવત્પ્રાપ્તેર્બ્રહ્મેન્દ્રાદિપદં ખલુ ॥ ૨૯॥

સ્વામી રામશ્ચ જીવાત્મા મન્તવ્યો રામસેવકઃ ।
જીવેશયોર્ન ચૈકત્વં દેહદેહિત્વહેતુતઃ ॥ ૩૦॥

કર્ત્તવ્યં સતતં કર્મ સ્મર્ત્તવ્યો રઘુનાયકઃ ।
શબ્દાદિવિષયાશ્ચાથ વિસ્મર્ત્તવ્યા હિ દુખદાઃ ॥ ૩૧॥

વૈષ્ણવાઃ પશ્ચ સંસ્કારાશ્ચાર્જનીયા હિ માનવૈઃ ।
વિશિષ્ટાદ્વૈતસિદ્ધાન્તો મન્તવ્યો વેદસમ્મતઃ ॥ ૩૨॥

ચિદચિદીશત્ત્વાનાં જ્ઞાનં જીવસુખાવહમ્ ।
અર્જનીયં પ્રયત્નેન ગુરુ શુશ્રૂષયા જનૈઃ ॥ ૩૩॥

ચિદર્થશ્ચેતનો જીવોઽચિદર્થોઽચેતનં મતમ્ ।
ઉભાવીશસ્ય દેહૌ સ્તસ્તયોર્દેહી પરેશ્વરઃ ॥ ૩૪॥

અણુર્જ્ઞાનાશ્રયો જીવઃ સચ્ચિદાનન્દરૂપકઃ ।
પ્રાણતો બુદ્ધિતશ્ચાપિ ભિન્નો દેહાત્ તથેન્દ્રિયાત્ ॥ ૩૫॥

અનિત્યો મધ્યમે માને વિભૌ ગત્યાગતી ન ચ ।
ભોગાભાવસ્ત્વનિત્યત્વે સ્તન્યપાનં શિર્શોન ચ ॥ ૩૬॥

પ્રાણસ્ય જીવતાં નાસ્તિ “મમ પ્રાણઃ” પ્રતીતિતઃ ।
“મમ જ્ઞાનમ્” પ્રતીતેશ્ચ જ્ઞાનેઽપિ જીવતા ન હિ ॥ ૩૭॥

મૃતે હિ વ્યભિચારાન્નો શરીરસ્ય તુ જીવતા ।
ઇન્દ્રિયાણં ન જીવત્વં તન્નાશે વ્યભિચારતઃ ॥ ૩૮॥

આત્મેશસ્ય નિયામ્યશ્ચ ધાર્યઃ શેષસ્તથાઽજડઃ ।

ભિન્નાઃ પરસ્પરં જીવા નિત્યા ભિન્નાસ્તથેશ્વરાત્ ॥ ૩૯॥

અન્યથા ન ચ જાયેરન્ સુખિદુઃખિપ્રતીતયઃ ।
કર્ત્તારશ્ચાથ ભોક્તારઃ સુખજ્ઞાનસ્વરૂપકાઃ ॥ ૪૦॥

ઈશ્વરાધીનકર્માણઃ સર્વે જીવાઃ પ્રકીર્ત્તિતાઃ ।
બધ્દા મુક્તાશ્ચ નિત્યાશ્ચ જીવાસ્ત્રિધામતાબુધૈઃ ॥ ૪૧॥

બધ્દા સંસારિણો જ્ઞેયા મુક્તાઃ સંસારપારગાઃ ।
કદાચિદપિ સંસારમપ્રાપ્તા નિત્યમુક્તકાઃ ॥ ૪૨॥

મુક્તિઃ શ્રીરામસમ્પ્રાપ્તિર્નિત્યા હિ નિત્યધામનિ ।
ભક્ત્યાઽથવા પ્રપત્ત્યા સા સમ્પ્રાપ્યતેઽર્ચિરાદિના ॥ ૪૩॥

શ્રીમદ્રામસ્મૃતિર્ભક્તિઃ પ્રારબ્ધાન્તે હિ મુક્તિદા ।
સ્વાત્માર્પણં હિ રામાય પ્રપત્તિર્દૈવનાશિની ॥ ૪૪॥

કાલશ્ચ પ્રકૃતિશ્ચાથ નિત્યધામ તથા મતિઃ ।
ચતુર્ધા સમ્મતં પ્રાજ્ઞૈર્શાનશૂન્યમચેતનમ્ ॥ ૪૫॥

સત્વાદિભિર્ગુણૈઃ શૂન્યસ્તન્ત્ર કાલઃ પ્રકીર્ત્તિતઃ ।
ઈશ્વરસ્ય શરીરં ચ ક્રીડાપરિકરઃ સ ચ ॥ ૪૬॥

કાલમપેક્ષ્ય સર્વેશઃ પ્રકૃતિં વિકરોતિ હિ ।
સર્વહેતુર્દ્વિધા કાલઃ ખણ્ડાખણ્ડવિભેદતઃ ॥ ૪૭॥

કલાકાષ્ઠાદિરૂપશ્ચ તત્રાદ્યઃ પરિકીર્ત્તિતઃ ।
અખણ્ડસ્તુ મતઃ કાલો નિત્યસ્તથા વિભુર્બુધૈઃ ॥ ૪૮॥

પ્રધાનં ચેશલીલાયાં સાધનં પ્રકૃતિર્મતા ।
માયાઽવિદ્યાપ્રધાનેતિ તસ્યા નામાન્તરાણિ હિ ॥ ૪૯॥

સત્વં રજસ્તમશ્ચેતિત્રયો ગુણાઃ શ્રિતાશ્ચ યત્ ।
પ્રકૃત્યાખ્યાં હિ તત્ તત્ત્વં વિદ્વદ્ભિઃ પરિકીર્ત્તિતમ્ ॥ ૫૦॥

ઈશ્વરાધિષ્ઠિતં તદ્ધિ જગતઃ કારણં મતમ્ ।
દેશકાલવિભેદેન સમાસમવિકારકમ્ ॥ ૫૧॥

ગુણાનાં પ્રલયે સામ્યે વિકારાઃ પ્રકૃતેઃ સમાઃ ।
સૃષ્ટિકાલે ચ વૈષમ્યે વિકારાશ્ચાસમા મતાઃ ॥ ૫૨॥

પ્રકૃતેશ્ચ વિકારો યઃ પ્રથમઃ સ ત્રિધા મહાન્ ।
તદ્વિકારસ્ત્વહઙ્કારઃ સત્વાદિભેદતસ્ત્રિધા ॥ ૫૩॥

સાત્વિકાહઙ્કૃતેસ્તત્ર જાતાનિ ચેન્દ્રિયાણિ હિ ।
જ્ઞાનકર્મેન્દ્રિયત્વાભ્યાં દ્વિધા તાનિ મતાનિ ચ ॥ ૫૪॥

મનઃ શ્રોત્રં ચ ચક્ષુસ્ત્વં રસનં ઘ્રાણમાદિમમ્ ।
વાક્પાદપાયુપસ્થેતિ કર્મેન્દ્રિયં બુધૈર્મતમ્ ॥ ૫૫॥

જાતં હિ શબ્દતન્માત્રં તામસાહઙ્કૃતેરિહ ।
શબ્દતન્માત્રતો જાતં ભૂતમાકાશસંજ્ઞકમ્ ॥ ૫૬॥

તતશ્ચ સ્પર્શતન્માત્રં તતો વાયુરજાયત ।
તતશ્ચ રૂપતન્માત્રં તેજોભૂતમભૂત્ તતઃ ॥ ૫૭॥

તેજસો રસતન્માત્રં જાતાશ્ચાપસ્તતશ્ચ હિ ।
અદ્ભ્યશ્ચ ગન્ધતન્માત્રં તતો ભૂમિરજાયત ॥ ૫૮॥

મેલયિત્વા ચ ભૂતાનિ સસર્જાણ્ડં હિ રાઘવઃ ।
ઉત્પાદિતો વિધિસ્તત્ર વ્યષ્ટિસૃષ્ટિં કરોતિ હિ ॥ ૫૯॥

અસઙ્ખ્યાનિ હિ ચાણ્ડાનિ સઙ્કલ્પાત્ સૃજતિ પ્રભુઃ ।
તદન્તર્ગત વસ્તૂનિ સૃજ્યન્તેઽન્તઃસ્થશાર્ઙ્ગિણા ॥ ૬૦॥

શબ્દઃ સ્પર્શસ્તથારૂપં રસો ગન્ધસ્તથા ગુણાઃ ।
ક્રમાન્નભોઽનિલાદીનામસાધારણતા ગતાઃ ॥ ૬૧॥

સમ્ભવતિ ન ચાવિદ્યા કર્મરૂપા તુ યત્ર હિ ।
નિત્યધામેતિ વિદ્વદ્ભિસ્તસ્ય નામ પ્રકીર્ત્તિતમ્ ॥ ૬૨॥

શુદ્ધસત્વં તથા નિત્યવિભૂતિર્મુક્તિધામ ચ ।
નામાન્તરાણિ તસ્યૈવ તત્ પરાગજડં મતમ્ ॥ ૬૩॥

રજસ્તમો વિહીનં હિ શુદ્ધં સત્વં તદાશ્રિતમ્ ।
નિત્યમુક્તેશ્વરાણાં તદ્ ભોગાસ્થાનાદિ સમ્મતમ્ ॥ ૬૪॥

મર્યાદારહિતં પ્રોક્તમૂર્ધ્વદેશેઽવિનશ્વરમ્ ।
રામાધીનં ચ તદ્ દ્રવ્યં ન કાલસ્તત્ર વૈ પ્રભુઃ ॥ ૬૫॥

ભક્ત્યા ચાથ પ્રપત્ત્યા તત્ પ્રાપ્યતે ત્વર્ચિરાદિના ।
યદ્ ગત્વા ન નિવર્ત્તન્તે રામધામ મતં હિ તત્ ॥ ૬૬॥

દીપપ્રભેવ યદ્ દ્રવ્યં વિમ્વચિચ્ચાજડં તથા ।
જ્ઞાનં તદ્ બ્રહ્મજીવાનાં ધર્મભૂતં મતં બુધૈઃ ॥ ૬૭॥

સઙ્કોચશ્ચ વિકાસશ્ચ તદ્વિકારૌ પ્રકીર્ત્તિતો ।
"ન વિજ્ઞાતુરિ" તિ શ્રૌતે વાક્યે તન્નિત્યતા શ્રુતા ॥ ૬૮॥

વિભુ જ્ઞાનં ચ બદ્ધાનાં ત્વાચ્છાદ્યતે હિ કર્મણા ।
બ્રહ્મણો નિત્યમુક્તાનાં જ્ઞાનં ચ સર્વદા વિભુ ॥ ૬૯॥

જ્ઞાનં સ્વતઃ પ્રમાણં હિ સ્વીકૃતં વેદવેદિભિઃ ।
સર્વં જ્ઞાનં યથાર્થં હિ વિષયે સત્યત્તા યતઃ ॥ ૭૦॥

ભક્તિશ્ચાથ પ્રપત્તિશ્ચ જ્ઞાનાવસ્થે ચ મુક્તિદે ।
અવિચ્છિન્ના સ્મૃતિર્ભક્તિર્વિવેકાદિકસમ્ભજા ॥ ૭૧॥

પ્રપત્તિર્હિ મતા શ્રીમદ્ રામાયાત્મસમર્પણમ્ ।
પઞ્ચાનુકૂલતાદીનિ તદઙ્ગાનિ મતાનિ હિ ॥ ૭૨॥

સર્વેશ્વરશ્ચ શ્રીરામઃ હેયપ્રતિભટો મતઃ ।
સ્વાભાવિકસુખાદીનાં સદ્ગુણાનાં મહોદધિઃ ॥ ૭૩॥

સદ્બ્રહ્માદિપદાનાં ચ વાચ્યો ધ્યેયશ્ચ યોગિનામ્ ।
જગત્સૃષ્ટયાદિકર્ત્તા ચ જગન્મૂલં વિભુસ્તથા ॥ ૭૪॥

સૂર્યેન્દ્રાગ્નિમરુદ્દેવા મૃત્યુશ્ચ યદ્ભયાદિહ ।
સ્વાધિકારે પ્રવર્ત્તન્તે સ રામો બ્રહ્મસંજ્ઞકઃ ॥ ૭૫॥

દિવ્યદેહગુણશ્ચાથ દિવ્યશસ્ત્રાસ્ત્રભૂષણઃ ।
મુક્તિદઃ સકલારાધ્યો વિભૂતિદ્વયનાયકઃ ॥ ૭૬॥

પ્રાકૃતૈશ્ચ ગુણાકારૈઃ શૂન્યઃ સર્વવિમોહકઃ ।
વેદકૃદ્ વેદવેદ્યશ્ચ વેદત્રાતા ચ વેદદઃ ॥ ૭૭॥

સર્વજ્ઞઃ સર્વશક્તિશ્ચ સર્વેષાં હિ સુહૃત્ તથા ।
ભજનીયશ્ચ સીતેશઃ સર્વાધારઃ સુખપ્રદ ॥ ૭૮॥

શ્રિતાપરાધવૃન્દં ચ વીક્ષતે નાત્મવત્તયા ।
એકેન સુકૃતેનાપિ સન્તોષં લભતે પરમ્ ॥ ૭૯॥

તતોઽધિકનિષેધાદ્ધિ ન માયોપાધિકશ્ચ સઃ ।

હેતુત્વાજ્જગતશ્ચાસ્ય તસ્ય નો નિર્વિશેષતા ॥ ૮૦॥

પરશ્ચ વિભવો વ્યૂહોઽન્તઃસ્થશ્ચાર્ચાવતારકઃ ।
ઇતિ પઞ્ચવિધઃ સોઽથાવતારી રક્ષિતું જનમ્ ॥ ૮૧॥

વાસુદેવાદયો વ્યૂહાઃ સાકેતે રાઘવઃ પરઃ ।
વિભવા મત્સ્યાદયોઽન્તઃસ્થોઽન્તર્યામી સમ્મતો બુધૈઃ ॥ ૮૨॥

સ્વર્ણાદિપ્રતિમારૂપો રામશ્ચાર્ચાવતારકઃ ।
શુદ્ધસત્વશરીરઃ સ મુક્તિદઃ સુલભઃ પરઃ ॥ ૮૩॥

દ્વારપીઠેશ્વર શ્રીલાહારામાચાર્યનિર્મિતમ્ ।
વૈષ્ણવધર્મપીયૂષ ભૂયાન્મૃત્યુભયાપહમ્ ॥ ૮૪॥

ઇતિ શ્રીલાહારામાચાર્યપ્રણીતં શ્રીવૈષ્ણવધર્મપીયૂષં સમ્પૂર્ણમ્ ।

Encoded and proofread by Mrityunjay Pandey

*Shri Laharamacharyapranitam Shrivaishnavadharmapiyusham*

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*